यावच्चूर्णमिदं सर्व्वं तावानेवात्र गुग्गुलुः ॥
सङ्कुट्य सर्व्वमेकत्र पिण्डं कृत्वा विधारयेत् ।
गुटिकाः शाणिकाः कृत्वा प्रभाते भक्षयेन्नरः ॥
गण्डमालां जयत्युग्रामपचीमर्व्वुदानि च ।
ग्रन्थ्यर्व्वुदानि गुल्मांश्च कुष्ठानि च भगन्दरम् ॥
प्रदेयश्चानुपानार्थं क्वाथो मुण्डितिकाभवः ।
क्वाथः खदिरसारस्य क्वाथः कोष्णोऽभयाभवः ॥”
इति काञ्चनारगुग्गुलुः ॥ * ॥
“चक्रमर्द्दकमूलस्य कल्कं दत्त्वा विपाचयेत् ।
केशराजरसे तैलं कटुकं मृदुनाग्निना ॥
पादशेषे विनिःक्षिप्य सिन्दूरमवतारयेत् ।
एतत्तैलं निहन्त्याशु गण्डमालां सुदारुणाम् ॥”
इति चक्रमर्द्दतैलम् ॥ * ॥
“गुञ्जामूलफलैस्तैलं विपक्वं द्विगुणाम्भसा ।
हरेदभ्यङ्गनस्याभ्यां गण्डमालां सुदारुणाम् ॥”
इति गुञ्जतैलम् ॥*॥ अथापच्याश्चिकित्सा ।
“चन्दनं साभया लाक्षा वचा कटुकरोहिणी ।
एभिस्तैलं शृतं पीतं समूलामपचीं हरेत् ॥”
इति चन्दनादितैलम् ॥ * ॥
“व्योषं विड़ङ्गं मधुकं सैन्धवं देवदारु च ।
तैलमेभिः शृतं नस्यात् सकृच्छ्रामपचीं हरेत् ॥”
व्योषादितैलम् ॥ * ॥ अथ ग्रन्थिचिकित्सा ।
“सर्ज्जिकामूलकक्षारशङ्खचूर्णसमन्वितम् ।
एतेन सहितो लेपो हन्ति ग्रन्थिं तथार्व्वुदम् ॥
ग्रन्थिर्न यो नश्यति भेषजेन
निष्काश्य तं शस्त्रचिकित्सकेन ।
जात्यादिपक्वेन घृतेन वैद्यो
व्रणेन चान्येन च संचिकित्सेत् ॥
ग्रन्थिमुत्कृत्य पश्चात्तु व्रणोक्तं क्रममाचरेत् ।
शिराग्रन्थिं विहायान्ये शेषे शस्त्रं प्रयुज्यते ॥”
इति भावप्रकाशः ॥
(यथास्याः सकारणलक्षणचिकित्सितानि ।
“दुष्टाम्बुपानसकदन्ननिषेवणाच्च
सञ्जायते च क्रिमिसम्भवगण्डमाला ।
सा मारुतेन कफपित्तभवे विकारे
संसर्पते क्रिमिजदोषगणाश्च गण्डात् ॥
वातेन वातसदृशानि च लक्षणानि
पित्तेन दाहसरुजव्रणशोषतापाः ।
सा श्लेष्मणा च घनशीतलसम्प्रयोगात्
स्यात् सन्निपातविहिता च समस्तलिङ्गैः ॥
तस्य चेमं प्रतीकारं वक्ष्यामि शृणु पुत्रक ! ।
रोहिणी विशदा चैव विजया च विभेदिनी ॥
कान्तारी वज्रपुष्पा च तथा चैन्द्रायुधा परा ।
इति सप्तविधा लूताः शृणु पश्चात् पृथक् पृथक् ॥
रक्तमुण्डा भवेद्रक्ता रक्तस्थाने च रोहिणी ।
विशदा मांसलस्थाने श्वेतवर्णा च दीर्घिका ॥
विजया च शिरो मध्ये पीतवर्णा यवप्रभा ।
भेदिनी मेदसः स्थाने श्वेता च नीलरेखिका ॥
कान्तारी च वस्तिमध्ये श्वेताङ्गा रक्तमुण्डिका ।
वज्रपुष्पा चास्थिमध्ये श्वेताकृष्णा शिरा मता ॥
वज्रायुधा शिरान्ते च धम्रा कृष्णा शिरा मता ।
रोहिण्यङ्गुलिमात्रेण मूत्रेण विशदा समा ॥
विजया च यवाकारा वर्त्तुला विजया तथा ।
अन्या नणाश्च विज्ञेया तण्डुली कण्टकानिभा ॥
रोहिणी विजया विंशा मांसस्थानसमाश्रिता ।
गुल्फे वा चास्थिसन्धौ च दृश्यते भेदिनी नरे ॥
कुक्षौ कर्णान्तरेऽपाङ्गे कान्तारी विद्धि पुत्रक ! ।
वज्रपुष्पा शिरसि च शिरान्तार्त्तिप्रदा मता ॥
अतो वक्ष्यामि भैषज्यं शृणु पुत्र ! प्रयत्नतः ।
सान्द्रपूयविस्रावश्च गम्भीरश्च व्रणं विदुः ॥
अतश्च सरुजश्चैव पक्वजम्बूसमप्रभम् ।
लूताव्रणानाञ्चैतानि अपक्वं यदि दृश्यते ॥
त्यक्त्वा सन्धिस्थमर्म्मस्थां लूताश्चैव हि तद्व्रणम् ।
तदा तप्तेन तैलेन दाहश्चाशु विधीयते ॥
अङ्कोलस्यैवमद्यानि पारिभद्रदलानि च ।
गृहधूमं कृष्णजीरं गोमूत्रेण तु पेषितम् ॥
लेपनञ्च प्रशस्तञ्च लूतानां मारणं परम् ।
पिण्डीतकं विड़ङ्गानि तथा चेङ्गुदिमूलकम् ॥
बीजपूरकमूलानि पेषितानि विलेपयेत् ।
गण्डमालां तथा घोरां हन्ति शीघ्रं प्रकण्टकाम् ।
स्नुहीक्षीरञ्चार्कक्षीरं लूतारन्ध्रे नियोजयेत् ॥
तेन कीटस्तु तन्मध्ये म्रियते नात्र संशयः ।
आस्फोतो गिरिकर्णी च चन्दनञ्च समांशकम् ॥
पिष्ट्वा लेपः प्रयोक्तव्यो लूतां हन्ति सुदारुणाम् ।
करवीरञ्चार्कदुग्धं तथा च कटुतुम्बिकाम् ॥
निशाद्वयं जाङ्गलिकां तिलतैले विपाचयेत् ।
लूतामभ्यञ्जने हन्ति गण्डमालाञ्च दारुणाम् ॥
घृतं जात्यादिकं नाम तथा चात्र प्रयोजयेत् ।
अन्यान्यपि व्रणे यानि प्रोक्तानि च यथाविधि ॥”
इति महर्ष्यात्रेयभाषिते हारीतोत्तरे तृतीयस्थाने लूतागण्डमालाचिकित्सा नाम सप्तत्रिंशोऽध्यायः ॥
“गलस्य पार्श्वे गलगण्ड एकः
स्याद्गण्डमाला बहुभिस्तु गण्डैः ।
साध्याः स्मृताः पीनसपार्श्वशूल-
कासज्वरच्छर्द्दियुतास्त्वसाध्याः ॥
तेषां सिरा-काय-शिरो-विरेकौ
धूमः पुराणस्य घृतस्य पानम् ॥”
इति चरके चिकित्सास्थाने सप्तदशेऽध्याये ॥)

गण्डमालिका, स्त्री, (गण्डानां ग्रन्थीनां मालाऽस्या अस्यां वा इति कप् । ततष्टाप् अत इत्वञ्च।) लज्जालुवृक्षः । इति रत्नमाला ॥

गण्डशैलः, पुं, (गण्ड इव शैलः स्खलितस्थूलोपलः । शैलशब्दोऽत्र शैलावयवे वर्त्तते । “विशेषणं विशेष्येण बहुलम् ।” २ । १ । ५७ । इति समासः । यद्वा शैलस्य पर्व्वतस्य गण्ड इव । राजदन्तादित्वात् पूर्व्वनिपातः ।) गिरेश्च्युतः स्थूलोपलः । भूकम्पादिना पर्व्वतात् गलितो महान् प्रस्तरः । इत्यमरः । २ । ३ । ६ ॥ (यथा, आर्य्यासप्तशत्याम् । १९६ ।
“किं पुत्रि ! गण्डशैलभ्रमेण नवनीरदेषु निद्रासि ।
अनुभव चपलाविलसितगर्ज्जितदेशान्तर-
भ्रान्तीः ॥”)
ललाटम् । इति हेमचन्द्रः । ४ । १०२ ॥

गण्डाङ्गः, पुं, (गण्ड इव उच्छ्रयमङ्गमस्य ।) खड्गी । इति शब्दचन्द्रिका ॥

गण्डारिः, पुं, (गण्डस्य रोगविशेषस्य अरिः । तन्नाशकत्वात्तथात्वम् ।) कोविदारवृक्षः । (यथा,—
“काञ्चनाल ! काञ्चनको गण्डारिः शोणपुष्पकः ॥”
इति भावप्रकाशः ॥)

गण्डाली, स्त्री, (गण्डं अलतीति । अल् + “कर्म्मण्यण् ।” ३ । २ । १ । इत्यण् । गण्डेन ग्रन्थिना आल्यते भूष्यते वा । अल् + घञ् स्त्रियां ङीष् ।) श्वेतदूर्व्वा । इत्यमरः । २ । ४ । १५९ ॥ सर्पाक्षी । इति भावप्रकाशः ॥ गण्डदूर्व्वा । इति राजनिर्घण्टः ॥

गण्डिः, पुं, (गड़ि + इन् ।) वृक्षस्य मूलाच्छाखावधिभागः । इति हेमचन्द्रः । ४ । १८६ ॥ गुँड़ि इति भाषा ॥

गण्डीरः, पुं, (गण्ड + ईरन् ।) समष्ठिला । शना इति ख्यातः । समठ इति ख्यातः । अनूपदेशजं शाकम् । इति केचित् । गुण्डिया इति ख्यातशाकम् । इति सर्व्वानन्दः । इत्यमरटीकायां भरतः ॥ (“गण्डीरः शाकविशेषो गण्डीनीति लोके गण्डारी मञ्जिष्ठा च ।” इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥ अस्य गुणा यथा, चरके सूत्रस्थाने २७ अध्याये ।
“वायुं वत्सादनी हन्यात् कफं गण्डीरचित्रकौ ॥”)
वीरः । इति जटाधरः ॥

गण्डीरी, स्त्री, (गण्डीर + गौरादित्वात् ङीष् । यद्वा गण्डं रोगविशेषं ईरयति दूरीकरोति स्वनिर्य्यासादिभिरिति शेषः ।) सेहुण्डवृक्षः । इति राजनिर्घण्टः ॥ सिज इति भाषा ॥

गण्डुः, पुं स्त्री, (गण्ड्यते शिरोभागः स्थाप्यतेऽत्र । गड़ि + अधिकरणे उन् ।) उपधानम् । इति जटाधरः ॥

गण्डूपदः, पुं, (गण्डवः ग्रन्थयः ताभिरन्वितानि पदानि यस्य । शाकपार्थिवादित्वात् समासः ।) किञ्चुलुकः । इत्यमरः । १ । १० । २२ ॥
(“गण्डूपदस्य रूपाणि पिच्छिलानि मृदूनि च ॥”
इति वैद्यकमाधवकररोगविनिश्चये अर्शोऽधिकारे ॥)

गण्डूपदभवं, क्ली, (गण्डूपद इव भवति उत्पद्यते इति । भू + अच् ।) सीसकम् । इति हेमचन्द्रः ।३।१०७ ॥

गण्डूपदी, स्त्री, (गण्डूपद + स्त्रियां अल्पार्थे ङीष् ।) किञ्चुलुकपत्नी । तत्पर्य्यायः । शिली २ । इत्यमरः । १ । १० । २४ ॥ सिली ३ क्षुद्रकिञ्चुलुकजातिः । इत्यमरटीकायां भरतः ॥ छोटजाति कुँचुया इति भाषा ॥

गण्डूषः, पुं, (गड़ि + “गण्डेश्च ।” उणां ।४।७८। इति ऊषन् ।) मुखपूरणम् । (यथा, भागवते । ९ । १५ । ३ ।
“भीमस्तु विजयस्याथ काञ्चनो होत्रकस्ततः ।
तस्य जह्नुः सुतो गङ्गां गण्डूषीकृत्य योऽपिबत् ॥”)
हस्तिशुण्डाग्रभागः । प्रसृतिपरिमितम् । इति मेदिनी । षे ३५ ॥ (यदाह कश्चित् ।